# Batukabhairava Rahasyam

# बटुकभैरवरहस्यम्

## Document Information

Text title : Batukabhairava Rahasyam

File name : baTukabhairavarahasyam.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : October 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 13, 2025

*sanskritdocuments.org*

# बटुकभैरवरहस्यम्

श्रीदेव्युवाच -
भगवन् देवदेवश ! रहस्यं बटुकाय मे ।
ब्रूहि येन वशीकुर्यात् साधको भैरवं शिवम् ॥ १॥

श्रीबटुक उवाच -
शृणु देवि ! परं गोप्यं कथयामि सुशोभने ।
रहस्यं सिद्धिदं साक्षाद्बटुकस्य महात्मनः ॥ २॥

सर्वे बटुकदेवस्य साधने ये निरुपिताः ।
उपाया निष्फला एव विधानं वीरसाधनम् ॥ ३॥

यो वीरसाधनं हित्वा उपायं चान्यमाश्रयेत् ।
न स सिद्धिमवाप्नोति नरो वर्षशतैरपि ॥ ४॥

दक्षिणे भूचरः पातु वामे पातु सदाशिवः ।
केशान् पातु विशालाक्षो मूर्धानं मे मरुत्प्रियः ॥ ५॥

मस्तकं पातु भृग्वीशो नेत्रं पातु महामनाः ।
कपोलौ पातु वीरेशो गण्डौ गण्डारिमर्दनः ॥ ६॥

उत्तरोष्ठं विरुपाक्षो ह्यधरे योगिनीप्रियः ।
दन्ते वक्षसि विध्वंसी चिबुके पातु कालधृक् ॥ ७॥

कण्ठे रक्षतु मे देवो नीलकण्ठो जगद्गुरुः ।
दक्षस्कन्धे गिरीन्द्रेशो वामस्कन्धे च सुन्दरः ॥ ८॥

भुजे च दक्षिणे सर्वमन्त्रनाथः सदाऽवतु ।
वामे भुजे सर्वभीमो हृदयं पातु पाण्डुरः ॥ ९॥

दक्षस्तने पशुपतिर्वामे पातु महेश्वरः ।
उदरे सर्वकल्याणकारकोऽवतु मां सदा ॥ १०॥

नाभौ कामप्रतिध्वंसी जङ्घे पातु महामनाः ।
जानुनी पातु यामित्रो गुल्फो गौरीपतिः सदा ॥ ११॥

पादपृष्ठौ ज्ञाननिधिस्तथा पादाङ्गुलीर्हरः ।
पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥ १२॥

इति रक्षां समाधाय मन्त्ररक्षां ततश्चरेत् ।
अथ मन्त्ररक्षा -
ॐ ह्रां ह्रीं ह्रूं ह्रः पूर्वे भैरवाय नमः ।
ॐ ह्रिं ह्रुं ह्रौं ओग्नेय रुरु भैरवाय नमः ।
ॐ ह्रीं श्रीं दक्षिणे चण्ड भैरवाय नमः ।
ॐ ग्ल्हां ग्ल्हूं ग्ल्हीं नग नग नैर्ऋत्ये क्रोध भैरवाय नमः ।
ॐ प्रं श्रूं प्रूं सः सः पश्चिमे उन्मत्त भैरवाय नमः ।
ॐ ब्रां ब्रां ब्रां वायव्ये कपाल भैरवाय नमः ।
ॐ भ्रां भ्रां भ्रां उत्तरे भीषण भैरवाय नमः ।
ॐ प्रूं प्रूं स्रूं फट् ईशाने संहार भैरवाय नमः ।

॥ इति श्रीश्वरदेवीसंवादे रुद्रयामले तन्त्रे बटुकभैरवरहस्यं सम्पूर्णम् ॥

Notes:
The BaṭukaBhairvaRahasyaM बटुकभैरवरहस्यम् includes Mantra-s मन्त्राः for the DaśaDiśaḥ दशदिशः .
The source publication of RudrayāmalaTantraM रुद्रयामलतन्त्रम् mentioning this composition needs to be ascertained.

Proofread by Ruma Dewan

*Batukabhairava Rahasyam*
pdf was typeset on October 13, 2025

Please send corrections to *sanskrit@cheerful.com*